योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ११

एकादशः सर्गः ११

विश्वामित्र उवाच ।

एवं चेत्तन्महाप्राज्ञा भवन्तो रघुनन्दनम् ।

इहानयन्तु त्वरिता हरिणं हरिणा इव ।। १

एष मोहो रघुपतेर्नापद्भ्यो न च रागतः ।

विवेकवैराग्यवतो बोध एव महोदयः ।। २

इहायातु क्षणाद्राम इह चैव वयं क्षणात् ।

मोहं तस्यापनेष्यामो मारुतोऽद्रेर्घनं यथा ।। ३

एतस्मिन्मार्जिते युक्त्या मोहे स रघुनन्दनः ।

विश्रान्तिमेष्यति पदे तस्मिन्वयमिवोत्तमे ।। ४

सत्यतां मुदितां प्रज्ञां विश्रान्तिमपतापताम् ।

पीनतां वरवर्णत्वं पीतामृत इवैष्यति ।। ५

निजां च प्रकृतामेव व्यवहारपरम्पराम् ।

परिपूर्णमना मान्य आचरिष्यत्यखण्डितम् ।। ६

भविष्यति महासत्त्वो ज्ञातलोकपरावरः ।

सुखदुःखदशाहीनः समलोष्टाश्मकाञ्चनः ।। ७

इत्युक्ते मुनिनाथेन राजा संपूर्णमानसः ।

प्राहिणोद्राममानेतुं भूयो दूतपरम्पराम् ।। ८

एतावताथ कालेन रामो निजगृहासनात् ।

पितुः सकाशमागन्तुमुत्थितोऽर्क इवाचलात् ।। ९

वृतः कतिपयैर्भृत्यैर्भ्रातृभ्यां च जगाम ह ।

तत्पुण्यं स्वपितुः स्थानं स्वर्गं सुरपतेरिव ।। १०

दूरादेव ददर्शासौ रामो दशरथं तदा ।

वृतं राजसमूहेन देवौघेनेव वासवम् ।। ११

वसिष्ठविश्वामित्राभ्यां सेवितं पार्श्वयोर्द्वयोः ।

सर्वशास्त्रार्थतज्ज्ञेन मन्त्रिवृन्देन मालितम् ।। १२

चारुचामरहस्ताभिः कान्ताभिः समुपासितम् ।

ककुब्भिरिव मूर्ताभिः संस्थिताभिर्यथोचितम् ।। १३

वसिष्ठविश्वामित्राद्यास्तथा दशरथादयः ।

ददृशू राघवं दूरादुपायान्तं गुहोपमम् ।। १४

सत्त्वावष्टब्धगर्भेण शल्येनेव हिमाचलम् ।

श्रितं सकलसेव्येन गम्भीरेण स्फुटेन च ।। १५

सौम्यं समं शुभाकारं विनयोदारमानसम् ।

कान्तोपशान्तवपुषं परस्यार्थस्य भाजनम् ।। १६

समुद्यद्यौवनारम्भं वृद्धोपशमशोभनम् ।

अनुद्विग्नमनानन्दं पूर्णप्रायमनोरथम् ।। १७

विचारितजगद्यात्रं पवित्रगुणगोचरम् ।

महासत्त्वैकलोभेन गुणैरिव समाश्रितम् ।। १८

उदारमार्यमापूर्णमन्तःकरणकोटरम्।

अविक्षुभितया वृत्त्या दर्शयन्तमनुत्तमम्।। १९

एवङ्गुणगणाकीर्णो दूरादेव रघूद्वहः ।

परिमेयस्मिताच्छाच्छस्वहाराम्बरपल्लवः ।। २०

प्रणनाम चलच्चारुचूडामणिमरीचिना ।

शिरसा वसुधाकम्पलोलदेवाचलश्रिया ।। २१

एवं मुनीन्द्रे ब्रुवति पितुः पादाभिवन्दनम्।

कर्तुमभ्याजगामाथ रामः कमललोचनः ।। २२

प्रथमं पितरं पश्चान्मुनी मान्यैकमानितौ ।

ततो विप्रांस्ततो बन्धूंस्ततो गुरुगणान्सुहृत् ।। २३

जग्राह च ततो दृष्ट्या मनाङ्मूर्ध्ना तथा गिरा ।

राजलोकेन विहितां तां प्रणामपरम्पराम् ।। २४

विहिताशीर्मुनिभ्यां तु रामः सुसममानसः ।

आससाद पितुः पुण्यं समीपं सुरसुन्दरः ।। २५

पादाभिवन्दनपरं तमथासौ महीपतिः ।

शिरस्यभ्यालिलिङ्गाशु चुचुम्ब च पुनःपुनः ।। २६

शत्रुघ्नं लक्ष्मणं चैव तथैव परवीरहा ।

आलिलिङ्ग घनस्नेहो राजहंसोऽम्बुजे यथा ।। २७

उत्सङ्गे पुत्र तिष्ठेति वदत्यथ महीपतौ ।

भूमौ परिजनास्तीर्णे सोंऽशुकेऽथ न्यविक्षत ।। २८

राजोवाच ।

पुत्र प्राप्तविवेकस्त्वं कल्याणानां च भाजनम् ।

जडवज्जीर्णया बुद्ध्या खेदायात्मा न दीयताम् ।। २९

वृद्धविप्रगुरुप्रोक्तं त्वादृशेनानुतिष्ठता ।

पदमासाद्यते पुण्यं न मोहमनुधावता ।। ३०

तावदेवाऽऽपदो दूरे तिष्ठन्ति परिपेलवाः ।

यावदेव न मोहस्य प्रसरः पुत्र दीयते ।। ३१

श्रीवसिष्ठ उवाच ।

राजपुत्र महाबाहो शूरस्त्वं विजितास्त्वया ।

दुरुच्छेदा दुरारम्भा अप्यमी विषयारयः ।। ३२

किमतज्ज्ञ इवाज्ञानां योग्ये व्यामोहसागरे ।

विनिमज्जसि कल्लोलबहुले जाड्यशालिनि ।। ३३

विश्वामित्र उवाच

चलन्नीलोत्पलव्यूहसमलोचनलोलताम् ।

ब्रूहि चेतःकृतां त्यक्त्वा हेतुना केन मुह्यसि ।। ३४

किंनिष्ठाः के च ते केन कियन्तः कारणेन ते ।

आधयः प्रविलुम्पन्ति मनो गेहमिवाखवः ।। ३५

मन्ये नानुचितानां त्वमाधीनां पदमुत्तमम् ।

आपत्सु चाऽप्रयोज्यं ते निहीना अपि चाधयः ।। ३६

यथाभिमतमाशु त्वं ब्रूहि प्राप्स्यसि चानघ ।

सर्वमेव पुनर्येन भेत्स्यन्ते त्वां तु नाधयः ।। ३७

इत्युक्तमस्य सुमते रघुवंशकेतु-

राकर्ण्य वाक्यमुचितार्थविलासगर्भम् ।

तत्याज खेदमभिगर्जति वारिवाहे

बर्ही यथा त्वनुमिताभिमतार्थसिद्धिः ।। ३८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे राघवसमाश्वासनं नामैकादशः सर्गः ।। ११ ।।